श्रये पूजयेत् पुमान् । पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः” । मत्स्यसूक्ते “ताम्रलिङ्गं कलौ नार्च्यं रैत्यस्य सीसकस्य च । रक्तचन्दनलिङ्गस्य शङ्खकांस्यायसं तथा” । मातृकाभेदतन्त्रे १२पटले “पार्थिवे शिवपूजायां सर्वसिद्धियुतो भवेत् । पाषाणे शिवपूजायां द्विगुणं फलमीरितम् । स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम् । सर्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् । ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसञ्चयः । गङ्गायाञ्च लक्षगुणं लाक्षायां रोगवान् भवेत् ।। स्फाटिके सर्वसिद्धिः स्यात् तथा मारकते प्रिये !। लौहलिङ्गे रिपोर्नाशं कामदं भस्मलिङ्गकम् । वालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम् । सर्वलिङ्गस्य माहात्म्यं धर्मकामार्थमोक्षदम् । संस्कारेण विना देवि ! पाषाणादौ न पूजयेत्” । “कृत्तिकातोलकं ग्राह्यमथ वा तोलकद्वयम् । एतदन्यन्न कुर्वीत कदाचिदपि पार्वति !” मातृकाभेदतन्त्रे ७प० । “मृत्तिकातोलकं ग्राह्यमथ वा तोलकद्वयम् । लिङ्गस्य प्रमाणेन घटनं कारयेद्बुधः । अङ्गुष्ठपर्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्” विश्वसारतन्त्रम् । त्रिस्थलीकरणमुक्तं कालोत्तरे “लिङ्गे वेद्यां तथा पीठे समस्तत्रिपातनात् । समस्तेव विजानीयात् त्रिस्थलीकरणन्त्विदम्” । ब्राह्मणादीनां मृत्तिकाभेदेन पूजाफलप्रशंसा तत्रोक्ता यथा “शुक्लं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत् । स एव विप्रो देवेशि ! त्रिवर्गफलभाग्भवेत् । क्षत्रियस्तु वरारोहे ! रक्तं निर्माय पार्थिवम् । पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत् । पीतं तु पार्थिवं देवि ! निर्माय यस्तु पूजयेत् । स च वैश्यो महेशानि ! त्रिवर्गफलभाग्भवेत् । कृष्णं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत् । स शूद्रः परमेशानि ! त्रिवर्गफलभाग्भवेत् । शिलादौ च महेशानि ! स्थूलञ्च फलदायकम् । अङ्गुष्ठमानं देवेशि ! यद्वा हेमाद्रिमानकम् । क्रमेण देवदेवेशि ! फलं बहुविधं स्मृतम् । स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि !। पूजना-द्वारणादापि फलं बहुविधं स्मृतम्” । स्थूलतरमिति पार्थिवलिङ्गेतरपरम् कृत्तिकातोलकं ग्राह्यमित्या-दिवचनात् । शिलास्फाटिकमरकतादीनां पञ्चस्थलीकरणमुक्तम् लैङ्गे “शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः । योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत्” । “लिङ्गस्य याद्विस्तारः परिणाहोऽपि तादृशः । लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसंमिता । कुर्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित् । रत्नादिशिवनिर्माणे मानमिच्छावशाद्भवेत्” । तन्त्रान्तरम् । लिङ्गशब्दव्युत्पत्तिर्यथा “आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका । आलयः सर्वदेवानां लयनाल्लिङ्गमुच्यते” स्कन्दपु० ।

“एकहस्तेन निर्माय पार्थिवं लिङ्गमर्चयेत् । तल्लिङ्गपूजनस्य फलमाप्नोत्यसंशयम् । तदेव स्यात्शतगुणं वामहस्तेन निर्मितम् । रुद्राक्षरणकेशादि शोधनञ्चैव पाणिना । “एवं कृते तु गृहिणां संसारात् स विमुक्तिः । इत्याधिकैर्वि शतिपलैर्मृद्भिः शैवं प्रयत्नतः । लिङ्गं निर्माय देवेशि ! पूजयेद्भक्तिसंयुतः” तन्त्रसारः ।

**शिवलोक** पु० ६त० । कैलासनामके स्थाने ।

**शिववल्लभ** त्रि० ६त० । १महादेवप्रिये २शतपत्र्यां स्त्री राजनि० । [२श्रीवल्लभ्यां च राजनि० ।

**शिववल्ली** स्त्री० शिवप्रिया वल्ली शा०त० । १लिङ्गिनीलतायां

**शिववाहन** न० शिवं वाहयति वह–णिच्–ल्यु । वृषभे राजनि० । [२शिवस्य शुक्रे च ।

**शिववीज** न० ६त० । १पारदे राजनि० । शिववीर्यादयोऽप्यत्र ।

**शिवशेखर** पु० शिवस्य शेखर इव । १धुस्तूरे राजनि० । २वकपुष्पे च जटा० ।

**शिवसुन्दरी** स्त्री ६त० । दुर्गायां तन्त्रसा० ।

**शिवा** स्त्री शो–वन् नि० । १मङ्गलवत्यां स्त्रियां २दुर्गायां “शिवा मुक्तिः समाख्याता योगिनां मोक्षदायिनी । शिवायै यां यजेद्देवीं शिवा लोके ततः स्मृता” देवीपु० ४५अ० । ३मुक्तौ ४शृगाले ५हरीतक्यां ६शमीवृक्षे ७तामलक्याम् अमरः । ८आमलक्यां मेदि० । ९हरिद्रायां १०दूर्वायां ११गोरचनायाञ्च राजनि० १२शृगाल्याम् अमरः । [राजनि० ।

**शिवाटिका** स्त्री शिवायाटति अट–ण्वुल् । वंशपत्र्यां

**शिवात्मक** न० शिवो मङ्गल आत्मा यस्य कप् । १सैन्धवे लवणे राजनि० । २शिवमये त्रि० ।

**शिवानी** स्त्री शिवं कल्याणमानयति आ+नी–ड गौरा० ङीष् । १जयन्तीवृक्षे शब्दच० २दुर्गायाञ्च ।

**शिवाप्रिया** पु० ६त० । १छागे त्रि० २तस्याः प्रियमात्रे त्रि० ।

**शिवापीड़** पु० ६त० । वकवृक्षे राजनि० । [राजनि० ।

**शिवाफला** स्त्री शिवाया इव फलं यस्याः । शमीवृक्षे

**शिवाबलि** पु० शिवाभ्यो देयो बलिः शा०त० । तन्त्रसा-